दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-181 | 1 | अप्रैल 23, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् वैशाखशुक्लसप्तमी
बैशाख 10 प्रविष्ठांशः मङ्गलमयः भवेत्

2 नगर- निकाय- निर्वाचनम्- नगरेषु ३.६० लक्षमतदातारः चेष्यन्ति नगर- निकाय- सर्वकारम्, १९५ स्थानानि महिलाभ्यः आरक्षितानि

3 सरदार- पटेल- विश्वविद्यालयस्य छात्रैः पृथ्वीदिवसोपलक्ष्ये पर्यावरण- जागरूकता- कार्यक्रमस्य आयोजनम्

5 नलबार्यां द्वादश-अन्ताराष्ट्रिय-योगदिवसस्य 'काउन्ट डाउन' कार्यक्रमः भव्यतया सम्पन्नः

# वैदिकानुष्ठानेन सह भक्तानां कृते केदारनाथधाम्नः द्वाराणि उद्घाटितानि



उत्तराखण्डे गतदिवसे प्रातः अष्टवादने वैदिकमन्त्रैः पारम्परिकानुष्ठानैः च भक्तानां कृते केदारनाथधाम्नः द्वाराणि उद्घाटितानि। तत्र उपस्थितानां बहुसंख्यकानां भक्तानां मध्ये उत्साहस्य भक्तेः च अद्वितीयः संगमः दृष्टः। अस्मिन् अवसरे उदग्रविमानेन मन्दिरे पुष्पवृष्टिः अभवत्। प्रथमा पूजा प्रधानमन्त्रिणः नरेन्द्रमोदिनः कृते आसीत्। मुख्यमन्त्री पुष्करसिंहधामी अपि अस्मिन् अवसरे उपस्थितः आसीत्।

## प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रशासनिक-अधिकारिणः विकसितभारतस्य निर्माणलक्ष्येन सह सर्वान् प्रयत्नान् योजयितुम् आहूतम्



प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रशासनिक-अधिकारिणः विकसितभारतस्य निर्माणलक्ष्येन सह सर्वान् प्रयत्नान् योजयितुम् आहूतम्। देशस्य प्रशासनिक सेवकेभ्यः लिखिते पत्रे, श्रीमोदी, निरन्तराधिगमे, क्षमता-निर्माणे च तेषां प्रतिबद्धतां अङ्गीकृतवान्। सहैव समाप्यमाने कर्मयोगी साधनासप्ताहे प्रशासनिक-सेवकाः उत्साहपूर्वकं भागग्रहणाय अभिनन्दयन् सः अवदत् यत् अस्मिन् सप्ताहे अधिगमोत्सवे सम्पूर्ण देशे नागरिकसेवकाः उत्साहेन सह सम्मिलिताः अभवन्।

## पहलगाम-भयोत्पादक-आक्रमणस्य प्रथमवर्षस्य अवसरे राष्ट्रस्य श्रद्धाञ्जलिः, वैश्विकनेतारः भारतेन सह ऐक्यभावं दृढीकुर्वन्, भयोत्पादनस्य निन्दां च कुर्वन्तः सन्ति।




पहलगाम आतङ्क्याक्रमणस्य प्रथमवर्षस्य अवसरे यूरोपीय सङ्घः भारतेन सह ऐक्य-भावं प्रकटितवान्। एकस्मिन् वक्तव्ये यूरोपीयसङ्घः अवदत् यत् गतवर्षे अप्रैल-मासस्य द्वाविंशति-दिनाङ्के आक्रमणे मृतानां षड्विंशति पीडितानां स्मरणे भारतस्य जनैः सह अस्ति। यूरोपीयसङ्घः सर्व-विध प्रकाराणां भयोत्पादनस्य दृढं निन्दाम् अकरोत्। नवदिल्ल्यां ब्रिटिश्-उच्चायोगेनापि श्रद्धाञ्जलिः समर्पितम् सहैव शान्तेः सुरक्षायाः च प्रतिबद्धतां पुनः दृढीकृतम्। अयं आक्रमणः जम्मू-कश्मीर्-प्रदेशे अभवत्, पाकिस्तानस्य लश्कर-ए-तैयबा इत्यनेन सङ्घटनेन कृतः आसीत्, यस्मिन् अधिकांशाः पर्यटकाः मृताः। घटनायाः अनन्तरं, भारतं पाकिस्तानाधिकृते जम्मू-कश्मीर्-प्रदेशे भयोत्पादक-आधारिक संरचनां लक्ष्यीकृत्य आपरेशन् सिन्दूर् इत्यस्य आरम्भम् अकरोत्।

## पश्चिम-एशिया-संघर्षस्य मध्ये तैल-प्राकृतिकवातेन्धनस्य अविरामापूर्तिः केन्द्रसर्वकारः

प्रशासनेन उक्तं यत् देशे तैलस्य वातेन्धनस्य च अविरामपूर्तिः सुनिश्चीयते। पश्चिम एशिया-विवादस्य विषये नवदेहल्याम् अन्तर्मन्त्रालयीयं विवरणं सम्बोधयन्ती पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य संयुक्तसचिवः सुजाता शर्मा इत्येषा अवदत् यत्, देशे एल्. पी. जी., पी. एन्. जी., पेट्रोल, डीज़ल् इत्येतेषां सामान्यपूर्तिः सुनिश्चेतुं सर्वविधोपायानि कृतानि सन्ति। सा अवोचत् यत् गृह्य एल. पी. जी. इत्यस्य आपूर्तिः सामान्यः अस्ति तथा च पञ्चचत्वारिं-शल्लक्षाधिकानि आरक्षणानि पञ्जी-कृतानि तथा च प्रायः एकपञ्चाशल्लक्षानि यावत् गृह्य एल्. पी. जी. इत्येतानि वितरितानि। सा अग्रे अवदत् यत् ह्यः अष्टसहस्राधिक-टन्- परिमितं यावत् वाणिज्यिक एल्. पी. जी. आवंटितानि। संयुक्तसचिवः निधि केसरवानी इत्येषा अवदत् यत्, सङ्कोचितस्य प्राकृतिकगैस् इत्यस्य तथा जैविकगैस् इत्यस्य च अन्तर्गतं वितरणकेन्द्राणां कृते अनुज्ञापत्राणाम् आवन्टन प्रक्रिया त्वरितीकृता अस्ति।

## तमिलनाडु-राज्ये एक-चरणीय मतदानस्य कृते, पश्चिमबङ्गप्रदेशे विधानसभा निर्वाचनस्य प्रथम-चरणीय मतदानस्य च कृते सर्वाः व्यवस्थाः कृताः सन्ति



तमिलनाडु-राज्ये एक-चरणीय मतदानस्य कृते, पश्चिमबङ्गप्रदेशे विधानसभा निर्वाचनस्य प्रथम-चरणीय मतदानस्य च कृते सर्वाः व्यवस्थाः कृताः सन्ति। तमिलनाडु-राज्ये राज्यस्य सर्वेषु त्रिचत्वारिंशदधिक द्विशत निर्वाचनक्षेत्रेषु मतदानं भविष्यति। प्रसारमाध्यमान् सम्बोधयन्ती राज्यस्य मुख्य निर्वाचन-अधिकारिणा अर्चना पटनायक इत्येषा अवदत् यत्, राज्ये सर्वत्र स्थापितेषु चतुःषष्ट्यधिक पञ्चसप्ततिसहस्र मतदानकेन्द्रेषु प्रायः त्रिसप्ततिलक्षाधिक पञ्चकोट्याधिकाः मतदातारः स्वमतानां प्रयोगं करिष्यन्ति। पश्चिमबङ्गालराज्ये प्रथमे चरणे षोडशमण्डलानां द्विपञ्चाशदधिकैकशतासनानि समाविष्टानि सन्ति। राज्ये द्वितीय-चरणस्य मतदानम् अस्मिन्नेव मासे ऊनविंशति दिनाङ्के भविष्यति।

## पर्यावरणसंरक्षणस्य समर्थनार्थं गतदिवसे सम्पूर्ण विश्वे 'भूदिवसः' आचरितः

पर्यावरणसंरक्षणस्य समर्थनार्थम् गतदिवसे सम्पूर्ण विश्वे 'भूदिवसः' आचरितः। प्रथमवारं सप्तत्यधिक-नवदशशततमे वर्षे आचर्यमाणः अयं दिवसः, नवषष्ट्यधिक-नवदशशततमे वर्षे यूनेस्को-सम्मेलने प्रस्तावितः, अयं दिवसः पृथिव्याः संरक्षणस्य आवश्यकतायाः विषये जनानाम् अवधानम् आकर्षयति।

## सुभाषितम्

**इहलोके हि धनिनां, परोऽपि स्वजनायते।**
**स्वजनास्तु दरिद्राणां, जीवितामेव नश्यति।।**

भावार्थः- इस संसार में धनवान् व्यक्तियों से अनजान व्यक्ति भी ऐसा सम्मान युक्त और मृदुल व्यवहार करते हैं कि जैसे वे उनके निकट सम्बन्धी हों। इसके विपरीत दरिद्र व्यक्तियों के निकट संबन्धी उनसे ऐसा व्यवहार करते हैं कि मानो वे जीते जी मर चुके हों।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## भारत-ऋतु-विभागेन आगामि-दिनद्वयोः देहल्याः, उत्तरमध्यराज्याणां च अनेकेषु राज्येषु उष्णतरङ्गस्य सञ्चेतना प्रसारिता

भारतीय-ऋतु-विज्ञान-विभागेन आगामि दिन-द्वयोः राष्ट्रीय राजधानी-प्रदेशे ऊष्णलहर्याः कृते प्रति 'पीतवर्णिय-संचेतना' प्रसारितास्ति। विभागेन पूर्वानुमितं कृतम् यत् आगामि दिन-द्वयोः हरियाणा-चण्डीगढे-पंजाब-उत्तर-प्रदेश-मध्यप्रदेश, छत्तीसगढ राज्येषु च ऊष्णतरंग प्रवर्तिष्यते। ओडिशा-राजस्थान-पश्चिमबङ्ग-राज्येषु च एतादृशी स्थितिः अपेक्ष्यते।

# नगर- निकाय- निर्वाचनम्- नगरेषु ३.६० लक्षमतदातारः चेष्यन्ति

## नगर- निकाय- सर्वकारम्, १९५ स्थानानि महिलाभ्यः आरक्षितानि




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य १० जनपदेषु ३,६०,८५९ मतदातारः अस्मिन् चक्रे नगर-निकायानां सर्वकारं चेतुं स्वकीयां प्रमुखां भूमिकां निर्वक्ष्यन्ति। कुलमतदातृषु १,८०,९६३ पुरुषाः, १,७९,८८२ महिला-मतदातारः च सम्मिलिताः सन्ति, यदा तु १४ अन्ये मतदातारः अपि सूच्यां पञ्जीकृताः। ५१ नगरनिकायेषु १९५ पदानि महिलाभ्यः आरक्षितानि सन्ति। जनपदवार-विवरणेषु काङ्गड़ा-मण्डलम् अग्रिमं वर्तते, यत्र १,००,८८४ मतदातारः पञ्जीकृताः सन्ति। तदनन्तरं मण्डी (६५,७२०) द्वितीयस्थाने, सोलनं (४९,०५९) तृतीयस्थाने वर्तते। सिरमौर जनपदे ३९,००४ मतदातारः स्वमताधिकारस्य प्रयोगं करिष्यन्ति। अन्येषु जनपदेषु ऊनायां २८,१३२, कुल्लौ २२,३९७, चम्बायां २०,६१९, बिलासपुरे १६,७७०, शिमलायां ११,४३७ मतदातारः च पञ्जीकृताः। हमीरपुर-जनपदः अन्तिमे स्थाने अस्ति, यत्र केवलं ६,८३७ मतदातारः एव सन्ति।

### १२ वैकल्पिक-प्रपत्रेषु कश्चित् एकं दर्शनीयम्-

नगर- निकाय- निर्वाचनम् अधिकृत्य भारतीय-निर्वाचन- आयोगेन मतदान-प्रक्रियाम् सुगमां कर्तुं प्रमुखाः निर्देशाः प्रसारिताः। आयोगेन स्पष्टीकृतं यत् यदि कस्यापि मतदातुः समीपे 'मतदाता- परिचयपत्रम्' उपलब्धं नास्ति, तर्हि सः निर्धारित- द्वादश (१२) वैकल्पिक-प्रमाणपत्रेषु कस्यचित् एकस्य आधारेण अपि मतदानं कर्तुं शक्नोति।

वैकल्पिक- प्रपत्राणि- चालक- अनुज्ञप्तिः, पैनकार्ड, सर्वकारीय-निजीसंस्थानां छायाचित्रयुक्त- परिचयपत्राणि, वित्तकोषस्य वा पत्रालयस्य वा 'पासबुक', खाद्यान्नपरिपत्रं (राशन-कार्ड), जाति- प्रमाणपत्र, छात्र-परिचयपत्रं, सम्पत्ति-प्रपत्रं, शस्त्र- अनुज्ञप्तिः, परिचालक- अनुज्ञप्तिः, निवृत्तिवेतन- प्रपत्रम्, आश्रित-प्रमाणपत्रं, रेल-बस-यानस्य पारपत्रम्, अक्षमता-प्रमाणपत्रं, स्वातन्त्र्य- सैनानी- प्रमाणपत्रम्, आधारपत्रम् अस्मिन् सम्मिलितानि सन्ति।

### ३१ मई पर्यन्तं मुख्यालयं त्यक्तुं न शक्ष्यन्ति उपायुक्ताः उपमण्डलाधिकारिणश्च

स्थानीय-निकाय-निर्वाचनस्य घोषणानन्तरं राज्य-निर्वाचन-आयोगेन प्रदेशस्य सर्वे उपायुक्ताः (DC), उपमण्डलाधिकारिणः, जनपद- पञ्चायत- अधिकारिणः खण्डविकास-अधिकारिणश्च स्व- स्व- मुख्यालयेषु उपस्थिताः भवितुम् आदिष्टाः। आयोगेन स्पष्टीकृतं यत् विना अनिवार्य-कारणैः कोऽपि अधिकारी मुख्यालयं न त्यक्ष्यति।

### नगरनिगमे एकलक्षं, नगरपञ्चायते ५० सहस्ररूप्यकाणि व्ययितुं शक्ष्यन्ति

राज्य-निर्वाचन-आयोगेन प्रत्याशिनां निर्वाचन- व्ययस्य अधिकतमसीमा निश्चिता। नगरनिगमस्य प्रत्याशिनः अधिकतमं १ लक्षं रूप्यकाणि, नगरपरिषदः ७५ सहस्ररूप्यकाणि तथा नगरपञ्चायतस्य प्रत्याशिनः ५० सहस्ररूप्यकाणि यावत् व्ययं कर्तुं शक्ष्यन्ति। सर्वैः प्रत्याशीभिः परिणाम-घोषणायाः ३० दिनाभ्यन्तरे स्व-व्यय- विवरणं 'रिटर्निंग-अधिकारी' महोदयाय प्रदेयं भविष्यति। निर्वाचन-कार्यक्रमात् सहैव 'आदर्श-आचारसंहिता' प्रवर्तते।


### 'वोटर-सारथी' अनुप्रयोग-माध्यमेन प्राप्स्यते मतदाता-सूची

आयोगेन मतदातॄणां प्रत्याशिनां च सूचनाः सुलभकर्तुं 'वोटर-सारथी' तथा 'डीपीएमआईएस' (DPMIS) अनुप्रयोगद्वयं विमोचितम्। अधुना मतदातारः 'वोटर-सारथी' अनुप्रयोग-माध्यमेन स्वस्य परिवारस्य च नाम सूच्यां द्रष्टुं शक्नुवन्ति। 'डीपीएमआईएस' एप-माध्यमेन प्रत्याशिनां विषये (नामाङ्कनं, निर्वाचन-चिह्नं, चल-अचल-सम्पत्तिः, आपराधिक-विवरणं च) 'रियल-टाईम' सूचनाः प्राप्स्यन्ते। ज्ञातव्यं यत् परिचयपत्रं केवलं परिचयस्य प्रमाणं वर्तते, मतदानस्य अधिकारः केवलं मतदाता-सूच्यां नाम्नि सति एव भवति।

### नगर-क्षेत्रेषु न भविष्यन्ति घोषणाः, न च नूतनकार्याणि

आचारसंहिता-काले नगरीय-क्षेत्रेषु नूतन-परियोजनानां घोषणा, शिलान्यासः उद्घाटनं च न भविष्यति। नूतन-नियुक्तीनां विज्ञापनार्थं, स्थानान्तरणार्थं च निर्वाचन-आयोगस्य अनुमतिः आवश्यकी भविष्यति। अस्मिन् निर्वाचने ५००० कर्मचारिणः नियुक्ताः भविष्यन्ति। संवेदनशील- मतदान- केन्द्राणां सुरक्षायाः कृते व्यापकाः प्रबन्धाः कृताः। मतदान-मतगणना-दिवसयोः 'मद्य-निषेध-दिवसः' भविष्यति।

# सुक्खु-सर्वकारेण जनतायै प्रदत्तं मूल्यवृद्धेः उपहारम्, हिमाचलभवनस्य सदनस्य च भाटकं त्रिगुणीकृतम्



| Sr. No. | Location | Room Number | Tariff inclusive of all taxes in (Rs.) |
|---|---|---|---|
| 1. | Himachal Bhawan, New Delhi | 405,406,407,307,308,309,310 | Rs 4,000/- |
| 2. | Himachal Sadan, New Delhi | 303,304,101,102 | -Do- |
| 3. | Himachal Bhawan, Chandigarh | 202,203,204,107,108,109 | -Do- |
| 4. | Willy's Park Circuit House | 512,514,322,523,411,412,414 | -Do- |

हिमसंस्कृतवार्ताः- शिमला। हिमाचलसर्वकारेण विविध-हिमाचलभवनानां 'परिधिगृहम्' इत्यस्य च केषाञ्चित् चयनित- प्रकोष्ठाणां भाटके (किराया) त्रिगुणादपि अधिका वृद्धिः कृता। सचिवालय-सामान्यप्रशासनविभागेन भाटकविषये नवीनाः दराः प्रवर्तिताः। नवदेहलीस्थितस्य हिमाचलभवनस्य प्रकोष्ठसङ्ख्या ४०५, ४०६, ४०७, ३०७, ३०८, ३०९ तथा ३१० इत्येतेषां भाटकं सर्वैः करैः (Taxes) सह ४,००० रूप्यकाणि प्रतिनिशा निश्चितं कृतम् अस्ति। एवमेव नवदेहली-हिमाचलसदनस्य प्रकोष्ठसङ्ख्या ३०३, ३०४, १०१, १०२, चण्डीगढ़- हिमाचलभवनस्य प्रकोष्ठसङ्ख्या २०२, २०३, २०४, १०७, १०८ तथा १०९, शिमलास्थितस्य 'विल्लीज पार्क' परिधिगृहम् इत्यस्य चयनितप्रकोष्ठानां कृते अपि एषैव दरः प्रवृत्तः भविष्यति। पूर्वम् एतेषां प्रकोष्ठानां मूल्यं १२०० रूप्यकाणि आसीत्।

सर्वकारेण प्रकोष्ठानां आबंटनविषये उपयोगविषये च स्पष्टाः निर्देशाः प्रसारिताः। एतेषु भवनेषु ३० प्रतिशतं प्रकोष्ठानां पुष्टिः (Confirmation) रात्रौ १२ वादने तथा ५० प्रतिशतं प्रकोष्ठानां पुष्टिः सायङ्काले ५ वादनपर्यन्तं भविष्यति। केवलं सः एव व्यक्तिः प्रकोष्ठे निवत्स्यति, यस्य नाम्ना 'आरक्षणं' भविष्यति। एतदतिरिच्य हिमाचलप्रदेश- पर्यटन- विकास-निगमाय (HPTDC) निर्देशाः दत्ताः यत् सः सर्वासु आवासीयसुविधासु गुणवत्तां निर्वहेत्। नवीनदराणां प्रवर्तनेन राजस्वे वृद्ध्या सह सुखसुविधानां सम्मार्जने (Maintenance) अपि परिष्कारस्य सम्भावना प्रकटिता अस्ति।



# अष्टसहस्रैः ट्यूलिपपुष्पैः सुगन्धितं जातं राष्ट्रपति- निवासस्थानम्, आगामि-सप्ताहे शिमलानगरम् आगमिष्यति द्रौपदी मुर्मू

**हिमसंस्कृतवार्ताः- शिमला।** छराबड़ा-स्थिते राष्ट्रपति- निवासस्थाने अष्टप्रकारकाणाम् अष्टसहस्रं ट्यूलिप-पुष्पाणां सुगन्धिः प्रसरति। राष्ट्रपतेः द्रौपदी मुर्मू महोदयायाः २७ अप्रैल दिनाङ्कात् प्रस्तावितस्य शिमला- भ्रमणस्य पूर्वमेव तस्याः छराबड़ा-निवासस्य उद्यानं वर्णरञ्जितैः पुष्पैः प्रदीप्तं दृश्यते।उद्यान-विभागेन अस्मिन् वारे विशेषसज्जतां कुर्वता जनवरीमासे एव प्रायः दश-सहस्रं ट्यूलिप-कन्दाः आरोपिताः आसन्। तेषु अष्ट-सहस्राणि पूर्णतया विकसितानि सन्ति। एतैः विकसितैः पुष्पैः राष्ट्रपति- निवासः एका जीवन्ता पुष्पवाटिका संजाता अस्ति। अस्मिन् वारे उद्याने अष्ट-प्रमुखाः ट्यूलिप-जातयः आरोपिताः, याः स्वकीयेन भिन्न- भिन्न- वर्णेन आकर्षणस्य केन्द्रं वर्तन्ते।

'डेनमार्क' जातेः रक्त-पीत-मिश्रितवर्णानां पुष्पाणि विशेषरूपेण चित्तं आकर्षन्ति। 'डीप पर्पल रॉक' इति जातयः कृष्ण-नीलवर्णेन (बैंगनी) सह गाम्भीर्यं दर्शयन्ति। 'सुपर वाइनर' जातिः प्रगाढ- मैरून- वर्णेन राजसीं शोभां विकिरति। 'स्ट्रॉन्ग गोल्ड' इत्यस्य उज्ज्वल-पीतवर्णीयाणि पुष्पाणि आतपे अधिकं विकसन्ति। 'एस्टा बोनिता' जातिः नारङ्ग-रक्तवर्णेन उद्यानं उष्णीकरोति, 'केट रोमन एम्पायर' श्वेत-पाटलवर्णयोः मिश्रणेन सौम्यतां योजयति। 'सन बेल्ट' इति जातिः सुवर्ण-पीतवर्णेन दमकते, 'अपेलडॉर्न' इत्यस्य रक्तवर्णीयाणि पुष्पाणि सम्पूर्णे परिसरे ऊर्जां संचारयन्ति। साम्प्रतं सूर्यतापात्, वृष्टेः, वन्यपशुभ्यः च रक्षणार्थं पुष्पाणि जालेन आच्छादितानि सन्ति, यानि २६ अप्रैल दिनाङ्के अनावरितानि भविष्यन्ति। निवासस्य प्रबन्धकेन संजू डोगरा महोदयेन उक्तं यत् राष्ट्रपतेः भ्रमणकारणात् २ मई पर्यन्तं निवासस्थानं सर्वेभ्यः पिहितं अस्ति। बहिः सौन्दर्यीकरणं पूर्णम्, अन्तः मर्मतकार्यं प्रचलति। राष्ट्रपति-निवासस्य 'द रिट्रीट' इत्यस्य बाह्यरूपं पूर्णतया परिवर्तितम्। भवनस्य भित्तिषु पारम्परिकः श्वेतवर्णः तथा काष्ठभागेषु धूसरलेपः कृतः, येन अस्य औपनिवेशिक- वास्तुकला अधिका स्पष्टा भवति। छदस्य बाह्यरूपस्य च मर्मतकार्यं सम्पन्नम्। आन्तरिकभागेषु विद्युत्-व्यवस्था आधुनिकीक्रियते। कक्षेषु नूतनाः तन्तवः, प्रकाशव्यवस्था, सुरक्षा- यन्त्राणि च स्थाप्यन्ते।

### प्रतिद्वारम् अशोकचक्रस्य प्रतीकम्

राष्ट्रपतेः आगमनं दृष्ट्वा परिसरस्य प्रत्येके प्रवेशद्वारे 'अशोकचक्रं' स्थापितम्। एतत् न केवलं भवनस्य गौरवम् वर्धयति अपितु सुरक्षाव्यवस्थां अपि सुदृढां करोति। मुख्यद्वारात् आरभ्य आन्तरिकमार्गान् यावत् सुरक्षायाः विशेषप्रबन्धाः कृताः। 'सीसीटीवी' यन्त्राणि, रोधकाः, निरीक्षणबिन्दवः च स्थाप्यन्ते। सुरक्षा-एजेन्सी-संस्थाः निरन्तरं निरीक्षणं कुर्वन्ति। अस्य भवनस्य इतिहासः प्रायः १७५ वर्षपुरातनः अस्ति, यत् ब्रिटिश-काले निर्मितं पश्चात् राष्ट्रपतेः ग्रीष्मकालीन-निवासत्वेन स्वीकृतम्।

# सरदार- पटेल- विश्वविद्यालयस्य छात्रैः पृथ्वीदिवसोपलक्ष्ये पर्यावरण- जागरूकता- कार्यक्रमस्य आयोजनम्





**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा, मण्डी** (हिमाचलप्रदेशः)सरदार- पटेल- विश्वविद्यालयस्य पर्यावरण- विज्ञान- विभागस्य छात्रैः विभागाध्यक्षस्य डॉ. सनीलठाकुर-महोदयस्य नेतृत्त्वे 'विश्व- पृथ्वी- दिवसः' निमित्ते 'शेमफोर्ड- लिटिल- स्टार- विद्यालये', 'राजकीय-माध्यमिक-विद्यालये (पड्डल)' पर्यावरण- जागरूकता- कार्यक्रमस्य साफल्येन आयोजनं कृतम्। अस्य कार्यक्रमस्य मुख्योद्देश्यं विद्यालयस्य छात्रेषु पर्यावरणसंरक्षणं प्रति चेतनाविस्तारः, तान् उत्तरदायित्वपूर्ण-नागरिकत्वेन प्रेरयितुम् आसीत्। कार्यक्रमे प्रश्नोत्तरी-प्रतियोगिता, भित्तिचित्र- निर्माणम् (पोस्टर), संवादात्मक- गतिविधि- माध्यमेन च बालकाः पर्यावरण- संरक्षणस्य विविधपक्षैः परिचायिताः। विश्वविद्यालयस्य छात्रैः प्लास्टिकपदार्थानां सीमितप्रयोगः, जल-संरक्षणम्, स्वच्छता- नियमपालनम् अत्यधिक-वृक्षारोपणस्य आवश्यकता इति विषयेषु विशेषं बलं दत्तम्। अस्मिन् आयोजने अतिथि- प्राध्यापकाः डॉ. निधि गुप्ता, डॉ. दीपक कुमारः, डॉ. असीमा-अवस्थी, एम. एससी. (पर्यावरण-विज्ञान) विभागस्य छात्राः दिव्या, निरञ्जना, मोक्षितः, कैलाशः, रीवा च सक्रियां सहभागितां कृतवन्तः। अस्मिन् अवसरे विश्वविद्यालयस्य कुलपतिः आचार्यः ललितकुमार- अवस्थिमहोदयः आभासी- माध्यमेन स्वसन्देशे छात्रान् सम्बोधयन्तः अवदन् यत् शिक्षण-संस्थानां भूमिका केवलं ज्ञान-प्रदाने सीमिता नास्ति, अपि तु सामाजिक-उत्तरदायित्वस्य शाश्वत-विकासस्य च मूल्यानां संस्थापनम् अपि तावदेव आवश्यकं वर्तते। ते छात्रान् प्रति आह्वानं कृतवन्तः यत् पृथ्वी-दिवसः प्रकृतिं प्रति अस्माकं कर्तव्यानां बोधस्य संकल्प- स्वीकारस्य च दिवसः अस्ति। ते पर्यावरणसंरक्षणं जीवनस्य अविभाज्य- अङ्गं कर्तुं छात्रान् प्रेरितवन्तः। योजना-विकास-अधिष्ठातृणां, कार्यकारी- परीक्षा- नियन्त्रकस्य विभागाध्यक्षस्य च डॉ. सुनीलठाकुर- महोदयस्य अध्यक्षीयभाषणे पर्यावरणीयसमस्याः समाधानमार्गाश्च स्पष्टीकृताः। सः उक्तवान् यत् वर्तमानकाले जलवायु- परिवर्तनम्, प्रदूषणं, प्राकृतिक-संसाधनानां च अविवेकपूर्ण- दोहनम् इति समस्यानां निवारणाय सामूहिकप्रयासाः अनिवार्याः सन्ति। कार्यक्रमस्य अन्ते सर्वे छात्राः पर्यावरण-संरक्षणस्य शपथं स्वीकृतवन्तः। स्व- दैनन्दिनजीवने लघुप्रयासैः प्रकृतिरक्षणस्य वचनं दत्तवन्तः। विद्यालय- प्रशासनेन अस्याः पहलवृत्तेः प्रशंसां कुर्वता उक्तं यत् एषः प्रयासः पर्यावरण- जागरूकता- संवर्धनाय महत्त्वपूर्णं सोपानम् अस्ति।

# धर्मशालायां आईपीएल-स्पर्धा नगरनिगम- निर्वाचनञ्च एकस्मिन् दिने, प्रशासन- पुलिस- विभागयोः कृते महदाह्वानम्

## धर्मशालायां २२ सहस्र-दर्शकाः, ३६ सहस्राधिकाः मतदातारः भागं ग्रहीष्यन्ति





**हिमसंस्कृतवार्ताः- धर्मशाला।** अन्ताराष्ट्रीय- ख्यातिप्राप्ते धर्मशाला-नगरे आईपीएल- क्रीडास्पर्धा तथा नगरनिगम- निर्वाचनं एकस्मिन् दिने, अर्थात् १७ मई रविवासरे, आयोज्यते। लोकतन्त्रपर्वणः अन्तर्गतं नगर- निगम- धर्मशालायाः १७ मतदानक्षेत्रेषु निर्वाचनं भविष्यति, यस्मिन् ३६ सहस्राधिकाः मतदातारः स्वीयान् जनप्रतिनिधीन् निर्वाचयिष्यन्ति। अस्य लोकतन्त्रपर्वणः सफलतायै निर्वाचन-आयोगः, प्रशासनं तथा पुलिस-विभागस्य अधिकारिणः सैनिकाश्च बहुसंख्यया नियुक्ताः भवन्ति।

अन्यतश्च हिमाचलप्रदेश- क्रिकेटसंघस्य अन्ताराष्ट्रीय- क्रिकेट-क्रीड़ाङ्गणे विराटकोहली- सहितैः देश-विदेश- प्रसिद्धैः क्रीडकैः युक्ता रॉयलचैलेंजर्स बेंगलुरु-दलस्य स्पर्धा आयोज्यते, यत्र स्वगृह-समूहस्य श्रेयसअय्यरः इत्यस्य-नेतृत्वे पंजाबकिंग्स-दलेन सह अपराह्णे ३:३० वादने स्पर्धा भविष्यति।

अतएव धर्मशालानगरे आयोज्यमानः अयं क्रीडासमागमः अपि अत्यन्तं महत्त्वपूर्णः मन्यते, यस्मिन् २२ सहस्राधिकाः दर्शकाः तथा व्यवस्थायां संलग्नाः सहस्रशः जनाः सहभागिनः भविष्यन्ति। अस्य कृते प्रशासनस्य तथा पुलिस-विभागस्य सहस्राधिकाः अधिकारिणः सैनिकाश्च सुरक्षा, यातायात- व्यवस्था तथा विधि-व्यवस्था-रक्षणस्य उत्तरदायित्वं वहन्ति। एवं सति प्रशासन-पुलिस-विभागयोः एकस्मिन् दिने उभयोः आयोजनयोः सुचारु-सम्पादनं महदाह्वानम् भविष्यति। अतः क्रीडास्पर्धानां आयोजनसम्बन्धे २५ अप्रैल-दिने आयोज्यमाना गोष्ठी अत्यन्ता महत्त्वपूर्णा मन्यते, यस्मिन् व्यवस्थापनाय विस्तीर्णा चर्चा भविष्यति।

## योजना निर्मास्यते-

हिमाचलप्रदेशक्रिकेटसंघस्य महासचिवः मनुज शर्मा उक्तवान् यत् स्पर्धानां सुचारु-सम्पादनार्थं सिद्धताः क्रियन्ते। प्रशासन- पुलिस-विभागाभ्यां सह गोष्ठीं कृत्वा समुचित-योजना निर्मास्यते।

## रणनीत्या कार्यं भविष्यति-

काङ्गड़ा-जनपदस्य अतिरिक्त-पुलिस-अधीक्षकः बीर- बहादुर- सिंह उक्तवान् यत् उभयोः महत्त्वपूर्णयोः आयोजनयोः सुचारु-आयोजनार्थं योजना निर्मास्यते। तेन उक्तं यत् अस्य कृते सभां कृत्वा विस्तीर्णा रणनीतिः निर्धारिता भविष्यति।

# हमीरपुरमण्डलस्य राजकीय- उच्च विद्यालयः कोटला कल्लर इत्यत्र विश्व- पृथ्वी- दिवसस्य भव्यम् आयोजनम्



**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा, हमीरपुरम्**
हिमाचलप्रदेशस्य हमीरपुर- मण्डलस्य राजकीय- उच्च- विद्यालय- कोटला कल्लर इत्यत्र 'विश्व- पृथ्वी- दिवसः' सोत्साहं परिपालितः। अस्मिन् कार्यक्रमे विज्ञानशिक्षिका कार्यक्रमप्रभारी पूजा महोदया विविधगतिविधीनाम् अध्यक्षतां कृतवती।

**विविध-शैक्षणिक-उपक्रमाः-**

अस्य दिवसस्य उपलक्ष्ये छात्राणां कृते पर्यावरण- संरक्षणाय अनेकाः गतिविधियः आयोजिताः। सर्वप्रथमं छात्रैः ग्रामे जन-जागरण-यात्रा विहिता। विविधैः उद्घोषैः पृथिव्याः, पर्यावरणस्य च संरक्षणस्य सन्देशः ग्रामवासिभ्यः प्रदत्तः। छात्रैः विविधप्रतियोगितासु अपि भागग्रहणं कृतम्। तत्र भित्तिचित्र-निर्माणम्, उद्घोष- लेखनम्, चित्रकला, भाषणम्, निबन्ध- लेखनम्, शपथ-ग्रहणम् इत्यादयः प्रमुखाः आसन्। छात्रैः स्व-कलामाध्यमेन पृथिव्याः संरक्षणस्य सन्देशः चित्रेषु प्रसारितः। कार्यक्रमप्रभारी विज्ञान शिक्षिका पूजा अवदत् यत् एतासां प्रतियोगितानां परिणामस्य घोषणा शीघ्रमेव भविष्यति। विजेतृछात्राणाङ्कृते च पुरस्कारम् दीयते। सा योजितवती यत् सम्प्रति सर्वत्र प्रदूषणस्य प्रभावो दृश्यते। नगरेषु उद्योगेषु निरन्तरं प्रदूषणं भवति। वाहनानाम् आवागमनेन मार्गे संचरणमपि कष्टकरमस्ति। वायुमण्डलं, जलं, भक्ष्यं, भूमिः च सर्वमपि दूषितं वर्तते। अतः अस्माभिः अस्मिन् समये अस्माकं समाजस्य बहुशुद्धिकरणं करणीयम्। येन जनाः यत्र तत्र मार्गेषु अवकरं न वितरेयुः। सर्वे एतस्य चिंतनस्य सम्मानं कुर्मः यत् यथा वयं स्वगृहस्य स्वच्छतां कुर्मः तथैव स्वपरिवेशस्य अपि स्वच्छता अस्माकं नैतिकं कर्त्तव्यमस्ति।

**शिक्षकाणां सहभागिता-**

अस्मिन् अवसरे विद्यालयस्य अन्ये शिक्षकाः रविन्द्र कुमारः, अञ्जू कुमारी, अञ्जना कुमारी, सोहन लालः च सक्रियरूपेण सहभागितां कृतवन्तः। सर्वैः शिक्षकैः मिलित्वा छात्रान् पर्यावरणस्य महत्त्वं बोधयित्वा भावि-सङ्कटेभ्यः पृथिवीं रक्षितुं प्रतिज्ञा कारिता।

# संस्कृतविश्वविद्यालयः चत्वार्यर्बुद- सप्तपञ्चाशत् कोट्यधिक- हानेः आयव्ययपत्रं स्वीकृतम्



## सीनेट सभायां वित्तवर्षस्य द्विसहस्र- षड्विंशत्यधिक- द्विसहस्रसप्तविंशत्योः आयव्ययपत्र- सहितानां प्रस्तावानामनुमोदनम्

### वेतनमदे एकोनसप्ततिः कोट्यधिकः व्ययः भविष्यति

**हिमसंस्कृतवार्ताः- विश्वमोहन झा, दरभङ्गा।** कामेश्वरसिंह- दरभंगा संस्कृत विश्वविद्यालय इत्यत्र माननीयकुलाधिपतेः लेफ्टिनेंट जनरल (सेवानिवृत्त) सैयद अता हसनैन अध्यक्षतायां वैशाखमासस्य द्वाविंशतितमे दिने आयोजितायां सीनेट्सभायां वित्तीयवर्षस्य द्विसहस्र- षड्विंशत्यधिक- द्विसहस्रसप्तविंशत्योः कृते प्रस्तावितम् आयव्ययपत्रं स्वीकृतम्।

आयव्ययपत्रं वित्तपरामर्शिना इन्द्र कुमार सभायाः पटलोपरी स्थापितम्, अनुमोदनार्थं निवेदितं च, अनन्तरं तत् पारितम्। अस्मिन् आयव्ययपत्रे कुलव्ययस्य अनुमानराशिः चत्वार्यर्बुदानि नवपञ्चाशत्कोटयः चतुःसप्ततिलक्षाणि एकविंशतिसहस्रं नवशतमेकम् रूप्यकाणि निर्दिष्टा। आन्तरिकस्रोतसः स्ववित्तपोषितसंस्थानानां च आयः द्वे कोट्यौ एकोनसप्तति-लक्षाण्यष्टत्रिंशत्सहस्रं त्रिशताष्टसप्ततिः रूप्यकाणि दर्शितः।एवं चत्वार्यर्बुदानि सप्तपञ्चाशत्कोटयः चत्वारिलक्षाणि त्र्यशीतिसहस्रं पञ्चशत् त्रयोविंशतिः रूप्यकाणां घाटयुक्तम् आयव्ययपत्रं प्रस्तुतम्, यस्मिन् सीनेट्सभायाः स्वीकृतिः प्राप्ता। अधुना तत् राज्यसरकाराय प्रेष्यते। गतवित्तीयवर्षे घाटराशिः चत्वार्यर्बुदानि अष्टचत्वारिंशत्कोटयः षट्षष्टिलक्षाणि पञ्चषष्टिसहस्रं नवशत् षट्त्रिंशत् रूप्यकाणि आसीत्। अतः अस्मिन् वर्षे प्रायः अष्टकोटिरूप्यकाणामधिकः अतिरिक्तघाटः अनुमानितः। उक्तां वार्तां दत्त्वा विश्वविद्यालयस्य जनसम्पर्काधिकारी डॉ. निशिकान्त अवदत् यत् आयव्ययपत्राधिकारी डॉ. पवन कुमार झा इत्यस्य पर्यवेक्षणे निर्मितम् आयव्ययपत्रम् अष्टसु विभागेषु विभक्तं कृत्वा विविधशीर्षेषु व्ययराशेः व्यवस्था कृता। दर्शितस्य घाटस्य प्रतिपूर्त्यर्थं राज्यसरकारतः, उच्चशिक्षासहायतायाः संस्थायाः, अन्यसंस्थानाभ्यश्च अनुदानदानरूपेण प्राप्तधनस्य उपयोगः भविष्यति। आन्तरिकसंसाधनविकासेनापि तस्य पूरणप्रयत्नः क्रियते। वर्तमानायव्ययपत्रे गतवर्षस्य अपेक्षया आन्तरिकायशीर्षे प्रायः एकोनसप्ततिलक्षरूप्यकाणि अधिकानि अनुमानितानि। अस्मिन् वर्षे शिक्षकेभ्यः वेतनव्ययशीर्षे अष्टपञ्चाशत्कोटयः दशलक्षाणि सप्तसहस्राणि षट्चत्वारिंशदधिकानि रूप्यकाणां व्ययः कल्पितः। तत्र स्नातकोत्तरविभागीय-शिक्षकेभ्यः त्रयः कोट्यः द्व्यशीतिलक्षाणि अष्टानवतिसहस्राणि चतुःशतानि सप्तत्रिंशत्। एकत्रिंशदङ्गीभूत- महाविद्यालयीय- शिक्षकेभ्यः चतुस्त्रिंशत्कोटयः एकोनषष्टिलक्षाण्य-ष्टत्रिंशत्सहस्राणि चतुःशतान्यष्टाविंशतिः। सम्बद्धशास्त्री-उपशास्त्रीमहाविद्यालयेभ्यः एकोनविंशतिः कोट्यः सप्तषष्टिलक्षाणि सप्ततिसहस्राणि सप्तशतानि नवपञ्चाशत्।

एवं गतवर्षस्य अपेक्षया अस्मिन् शीर्षे एककोटिः षोडशलक्षाणि दशसहस्राणि द्विशतान्यष्टषष्टिः न्यूनता कृताऽस्ति।तथैव शिक्षकेतरकर्मचारिणां वेतनमदे एकादशकोटयः एकोनत्रिंशल्लक्षाण्यष्ट-सप्ततिसहस्राण्यष्टशतान्यष्टादश अनुमानितम्।

अतः वेतनमदे एकोनसप्ततिः कोट्यः एकोनचत्वारिंशल्लक्षाणि षडशीतिसहस्राणि चतुःशतानि द्विचत्वारिंशत् राज्यसरकारात् याच्यते। अन्यतः निवृत्तिवेतन- पारिवारिकनिवृत्तिवेतन-सेवान्तलाभमदे अशीतिः कोट्यः एकसप्ततिलक्षाणि सप्ततिसहस्राणि सप्तशतानि विंशतिः व्ययः अनुमानितः। एवं वेतननिवृत्तिवेतनयोः बकायामदे एकमर्बुदं त्र्यशीतिः कोट्यः षड्विंशतिलक्षाणि सप्तषष्टिसहस्राणि षट्षष्टिः राज्यसरकारात् अपेक्ष्यते। कार्यालयस्य विविधमदेषु व्ययार्थं पूर्ववत् पञ्चाशीतिः कोट्यः द्विचत्वारिंशल्लक्षाणि नवनवतिसहस्राणि नवशतानि चतुर्विंशतिः अनुमानितम्। विकासकार्येषु गतवर्षवत् षड्विंशतिः कोट्यः द्वादशलक्षाण्येकोन-षष्टिसहस्राण्यष्टशतानि पञ्चनवतिः व्ययः कल्पितः। अतिथिशिक्षक- बाह्यसेवाकर्मचारिमदे चतुर्दशकोटयः चतुर्दशलक्षाणि विंशतिसहस्राणि व्ययप्रस्तावः अस्ति। एवं योजनामदे, अयोजनामदे च संयुक्तरूपेण कुलव्ययः चत्वार्यर्बुदानि पञ्चचत्वारिंशत्कोटयः षष्टिलक्षाण्येकसहस्रं नवशतमेकम् दर्शितः।

# शिमलानगरं भ्रमितुम् आगतैः पर्यटकैः पूर्णं रेलयानं आरक्षितम्, कालका-शिमला- रेलमार्गे ९२५७० रूप्यकाणि व्ययितानि

### चार्टर-विशेष-रेलयानसेवया शिमला-नगरं प्राप्ताः पर्यटकाः, टॉय-रेलयान-यात्रा स्मरणीया अभवत्



**हिमसंस्कृतवार्ताः- शिमला।** ग्रीष्म-ऋतौ आगमनेन सह पर्यटकैः पर्वतानां राज्ञी इति ख्यातस्य शिमला-नगरस्य प्रति गमनं आरब्धम्। रमणीय-पर्वतीय-उपत्यकानां सौन्दर्यस्य आस्वादनार्थं मङ्गलवासरे पर्यटकानां कश्चन समूहः कालका-शिमला-रेलमार्गे चार्टर-विशेष-रेलयानं आरक्ष्य शिमलानगरं प्राप्तवान्। प्रायः विंशतिः (२०) पर्यटकान् वहन्ती एषा विशेष-रेलयान-सेवा कालका-नगरात् शिमला-नगरं प्राप्तवती, यस्याः कृते समूहेन प्रायः 92570 रूप्यकाणि व्ययित्वा आरक्षणं कृतम्।

रेलयानं प्रातः ११:३० वादने कालका-नगरात् शिमलानगरस्य कृते प्रस्थितम्। कालका- शिमला- रेलमार्गः स्वस्य ऐतिहासिक-महत्त्वेन प्राकृतिक-सौन्दर्येण च प्रसिद्धः अस्ति, अतः पर्यटकाः अस्य मार्गस्य आनन्दं अनुभूय शिमला-नगरं गन्तुं रोचन्ते।कालकानगरात् शिमला-नगरपर्यन्तम् एषा यात्रा पर्वतैः, कन्दराभिः तथा हरित-उपत्यकाभिः परिपूर्णेषु प्रदेशेषु गच्छति, या यात्रिकेभ्यः विलक्षणम् अनुभवम् प्रददाति। अस्मिन् रेलमार्गे स्थिताः १०३ कन्दराः अस्य यात्रायाः रोमाञ्चं अधिकं वर्धयन्ति।

# ऑनलाइन-क्रीडानां (Online Gaming) प्रचाराय विनियमानाय च 'नियम-२०२६' इति अधिसूचितम्



भारत सर्वकारेण ऑनलाइन-क्रीडानां (Online Gaming) प्रचाराय विनियमानाय च 'नियम-२०२६' इति अधिसूचितम्, ये आगामि-मई-मासस्य प्रथमदिनाङ्कात् प्रभाविणः भविष्यन्ति। एतेषां नियमानां मुख्योद्देश्यं ऑनलाइन-क्रीडानां नियमनम्, नागरिकाणां सुरक्षां सुनिश्चितं करणम्, वित्तीयव्यवस्थायाः रक्षणम्, समन्वितं प्रवर्तनं सक्षमं करणम् तथा च प्रयोक्तॄणाम् (Users) अधिकाराणां संरक्षणं वर्तते। सर्वकारेण षट्सदस्यीयं 'ऑनलाइन-गेमिंग-प्राधिकरणम्' (Online Gaming Authority) गठितम्। इलेक्ट्रॉनिकी-सूचनाप्रौद्योगिकी-मन्त्रालयेन प्रसारितसूचनानुसारं, मन्त्रालयस्य अपरसचिवः अस्य प्राधिकरणस्य अध्यक्षः भविष्यति। अन्येषु पञ्चसु सदस्येषु गृह-मन्त्रालयस्य, सूचना-प्रसारण-मन्त्रालयस्य, क्रीडा-युवाकार्य-मन्त्रालयस्य, वित्तीयसेवा-विभागस्य तथा च विधि-विभागस्य संयुक्तसचिवाः सम्मिलिताः भविष्यन्ति।

प्राधिकरणस्य कार्येषु ऑनलाइन-क्रीडानां वर्गीकरणं पञ्जीकरणं च अन्तर्भवति। किमपि क्रीडनं धन-आधारितं (Money-based) अस्ति वा न इति अपि एतत् प्राधिकरणमेव निश्चेष्यति। अपि च, एतद् जनसामान्यानां तक्राराणां (Complaints) निवारणमपि करिष्यति। अनुपालनं सुनिश्चितं कर्तुं प्राधिकरणमिदं मार्गदर्शिकाः, आचारसंहितां निर्देशान् च निर्गमिष्यति।

# नलबार्यां द्वादश-अन्ताराष्ट्रिय-योगदिवसस्य 'काउन्ट डाउन' कार्यक्रमः भव्यतया सम्पन्नः



**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः**

भारतसर्वकारस्य आयुषमन्त्रालयस्य तथा मोरारजीदेसाई- राष्ट्रिय- योगसंस्थानस्य च तत्त्वावधाने नलबार्यां कुमारभास्करवर्म- संस्कृत- पुरातन- अध्ययन-विश्वविद्यालयेन योगविज्ञानविभागेन आन्तरिक- गुणवत्ता- आश्वासनकेन्द्रस्य (IQAC) सहयोगेन अद्य द्वादश-अन्ताराष्ट्रिय-योगदिवसस्य 'काउन्टडाउन' कार्यक्रमः आयोजितः। जनपदस्य नहेरबारीस्थित- बनभाग- बताहगिला- उच्चतर- माध्यमिक- विद्यालये प्रातः सार्धषड्वादने (६:३०) आयोजितस्य अस्य कार्यक्रमस्य स्वागतभाषणं विश्वविद्यालयस्य योगविज्ञानविभागस्य प्रभारी- विभागाध्यक्षा डॉ. अलका दास महोदया अकरोत्। अस्य कार्यक्रमस्य सञ्चालनं विश्वविद्यालयस्य सहायकप्राध्यापकेन उत्पल दत्तेन कृतम्।

ततः परं योगविज्ञानविभागस्य सहायकप्राध्यापिका कुमारी नीलू करिश्मा दास महोदया द्वादश- अन्ताराष्ट्रिय-योगस्य निर्देशान् दत्तवती। अस्य कार्यक्रमस्य मुख्यम् आकर्षणं "सामान्य- योग- प्रोटोकॉल" इत्यस्य अभ्यासः आसीत्, यत्र छात्राणाम्, शिक्षकाणां जनसामान्यानां च महती सहभागिता दृश्यते स्म।अस्य उद्देश्यं समग्रदेशे योगस्य प्रचारकरणं तथा च सर्वाङ्गीणस्वास्थ्यक्षेत्रे योगस्य महत्त्वं प्रति जागरूकतावर्धनं च अस्ति। अयं कार्यक्रमः एकस्य राष्ट्रिय- उपक्रमस्य भागः अस्ति, यत्र शताधिकानि संस्थानानि शतसंख्याकेषु नगरेषु योगस्य प्रचारं कुर्वन्ति। अस्मिन् कार्यक्रमे विद्यालय- महाविद्यालय- छात्राः, राष्ट्रियसेवाप्रकल्पस्य (NSS) सदस्याः, अङ्गनवाडी- आशाकर्त्र्यः, स्थानीय- योगसंस्थानानि, योगसाधकाः समाजस्य च विविधाः वर्गाः सम्मिलिताः अभवन्। विश्वविद्यालयस्य प्राध्यापिका डॉ. मल्लिका कलिता महोदया सर्वेभ्यः आगतेभ्यः नागरिकेभ्यः स्वागतं व्याहृतवती। अन्तर्राष्ट्रिय-योगदिवस-२०२६ इत्यस्य 'काउन्टडाउन' कार्यक्रमस्य अङ्गत्वेन विश्वविद्यालयस्य सभाकक्षे "स्वास्थ्य- प्रज्ञा- विश्वशान्तये योगः" इति विषये एका सङ्गोष्ठी अपि आयोजिता।

अनेन कार्यक्रमेण समाजस्य सर्वेषु स्तरेषु योगं प्रति उत्साहः वर्धिष्यते। अन्ताराष्ट्रिय- योगदिवसस्य स्वास्थ्य- समन्वय- कल्याणस्य च संस्कृतिः सुदृढा भविष्यति। कार्यक्रमस्य अन्ते आयुषमन्त्रालयस्य असमराज्यस्य संयुक्तनिदेशकः डॉ. शशि सोनोवाल, आयुषमन्त्रालयस्य नलबाडी- समन्वयकः हेमेन शर्मा, बनभाग- बताहगिला- उच्चतर- माध्यमिक- विद्यालयस्य प्रधानाचार्यः हितेश बर्मन, बी. आर. मेधि- विद्यालयस्य शिक्षिका अंशुमणि डेका, पत्रकारः मजीबुर रहमानः इत्यादयः गणमान्यव्यक्तयः आयोजकवृन्दैः सम्मानिताः अभवन्।

# "षड्भावविकाराः"

जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यति इति षड्भावविकाराः भवन्ति।

{१} **जायते-** यः क्रियाया प्रथम भावविकार वर्तते। अस्य भावः अस्ति उत्पन्नं भवति। यः भावः अस्तित्वस्य प्रतिषेधं करोति।

{२} **अस्ति-** इत्यस्य भाव शब्दोश्चोत्पनस्य सत्वस्यावधारणं तन्मात्रं ब्रवीति। "आत्म धारणानुकुलो व्यापारः" अस्ति शब्दस्य अर्थ अस्ति यः भावः न तु विपरिणामम् आचष्टे अपूर्णत्वात्। न तं प्रतिषेधयति उपस्थितत्वात्।

{३} **विपरिणमते-** इत्येष शब्द अपच्यमानस्य तत्वाद्भ्रश्यमानस्य विकारं विक्रियामात्रं ब्रवीति। न वृध्देरर्थमाचष्टे, अपूर्णत्वात् न च तां प्रतिषेधति उपस्थितत्वात्। अस्य अर्थ अस्ति 'परिवर्तनम्'।

{४} **वर्धते-** इत्येष शब्दः स्वेषामङ्गानां शिरोग्रीवाबाहूदरादीनामभ्युच्चयं ब्रवीति। अथवा हिरण्यधान्यादीनामभ्युच्चयं ब्रवीति। यथा वर्धते विजयेनेति वा वर्धते शरीरेणति वा। अत्र वर्धते इति ब्रुवाणो नापक्षयमाचष्टे, नापि तं प्रतिषेधयति।

{५} **अपक्षीयते-** तु तथैव, यथा स्वांगैः सांयोगिकैः वा द्रव्यैः उपचीयते। वृध्देः प्रतिलोम्यं तु अपक्षय एव भवति। तत्रापि नाचष्टेऽपरभावं न वा प्रतिषेधति। 'वर्धते'- इत्यस्य पदस्य सर्वथा विपरितः ज्ञेयः। उदा. अपक्षीयते शरीरेण।

{६} **विनश्यति-** इत्येषः शब्दः अपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे। तस्या च अवस्थायां विद्यमानपि पूर्वभावमपक्षीयतेरर्थ नाचष्टे न प्रतिषेधति। अस्यार्थेऽस्ति 'विनाशः'। अयं षड्भावविकारेषु अन्तिमः भावविकारः। यदा ह्रासः स्व- अन्तिम- सीमाम् आगच्छति तदा विनाशः प्रारभ्यते।

**डा. वर्षा प्रकाश टोणगांवकर ©® पुणे/ महाराष्ट्रम्**





हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा- ३०

युगानुकूलः धर्मः भवति। सौविध्यानुसारं हि धर्मनियमादीनां पालनं सम्भवति। यथा, सत्ययुगे तत्कालीकाः जनाः यथा धर्मनियमादीनां पालनं कुर्वन्ति स्म, तथा अपरेषु युगेषु तस्य यथावत् पालनं कर्तुं तत्तद्युगीयाः जनाः नार्हेयुः विविधकारणतः। कलौ तु तन्न सम्भवति कथञ्चिदपि। तस्माद् युगानुकूलधर्मः हि प्रशस्यते सर्वथा। अस्मिन् युगे कठोरतपः न सम्भवति, कारणं तादृशः परिवेशः नास्ति अधुना। तस्मात् नामधर्मः हि अद्यतनं साधनम् इति निर्दिष्टं शास्त्रेण। "कलौ केशवकीर्तनम्" इत्येव इदानीन्तनानां मूलधर्मः। विषयेऽस्मिन् किञ्चिदत्र प्रस्तूयते।

चैतन्यमहाप्रभुः अकथयत्- 'नाम्नामकारि बहुधा निजसर्वशक्तिस्तत्रार्पिता नियमितः स्मरणे न कालः।' इति। आशयो यत् भगवन्नाम्नः स्मरणजपादिकार्ये देश- काल- पात्राणां न कोऽपि नियमः स्यात्, अहर्निशं तत्कर्तुं शक्यते। अस्मच्छास्त्रेषु अनुभविनो महात्मनः अपि भगवन्नाम-स्मरण-जपविषये उक्तवन्तः सन्ति यत् कलियुगस्य मुख्यधर्मो हि हरिनाम इति। ऐहिक- पारलौकिकं कल्याणयुतं कर्तव्यं स्यादेतत्। जगतः समस्त-धर्मसम्प्रदायाः कस्मिन्नपि रूपे नामजपस्मरणादिकस्य महत्त्वं प्रतिपादयेयुः। भगवतः श्रीहरेर्नाम हि एकमात्रं जीवनम्। एतदतिरिच्य नान्यगतिः मनुष्यस्य।

विपदादिभ्यः परित्राणार्थम् अद्य श्रीभगवन्नाम्नः स्मरणं हि एकमात्रम् उपायः। जगति एतादृशो न कोऽपि विघ्नः स्यात्, यो भगवन्नाम्ना न दूरीभवेत्। एवमेव जगति एतादृशं वस्तु अपि न स्यात्, यच्च भगवन्नाम्ना न प्राप्येत। अस्मिन् कलिकाले मङ्गलमयस्य भगवतः आश्रयप्राप्त्यर्थं भगवन्नाम्नः अनुगमनं हि एकमात्रम् अवलम्बनमस्ति। उक्तमस्ति-

**'हरेर्नामैव नामैव नामैव मम जीवनम्।**
**कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा।।'**

(ना०पु०)

अद्य समस्तसंसारे मनुष्यो विपदापन्नः, नानासमस्याः च वर्धमानाः दृश्यन्ते। अधिकतरजनाः हि असीमितभौतिक-संसाधने, आवश्यकतायाः पूर्तौ च व्यस्ताः, संलग्नाः च दरीदृश्यन्ते। ते क्षुल्लक- स्वार्थसिद्ध्यर्थम् इतरेषाम् अहितं विधातुमपि न मनागपि संकोचम् अनुभवेयुः। पारस्परिकी ईर्ष्या, द्वेषः, वैमनस्यं, कलहः, हिंसा इत्यादिभिः विश्ववातावरणं हि अशान्तं जायमानमस्ति। क्वचित्तु हिंसायाः नग्नताण्डवं हि द्रष्टुं शक्यते सम्प्रति। अधिकतरजनाः मनोरोगिणो जायमानाः सन्ति। कलेः प्रकोपः सर्वत्र व्याप्तः अधुना। मनसि प्रश्नः उद्भवति यत् एतादृशस्थितेः समाधानं किमिति। वेदादिशास्त्राणि, ऋषिमहर्षयः, मुनयः च एनां स्थितिम् अन्तर्दृष्ट्या अवलोक्य बहुपूर्वं हि घोषितवन्तः आसन् यत् कलिकाले मानवकल्याणार्थम् एवं विश्वशान्त्यर्थं श्रीहरिनामातिरिच्य अपरं न किमपि सुलभसाधनं स्यादिति। अत एव भारतस्य एवं समस्तविश्वस्य कल्याणार्थं शान्त्यर्थञ्च सर्वैरपि सश्रद्धं श्रीभगवन्नाम हि अवलम्बनीयं, नान्योपायः इति, शुभम्।



**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

# वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ताकार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। अद्यतनवृत्तान्तेन अहं विस्मिता। गुरुग्रामनगरे एकस्य लघुगृहस्य पञ्चाशत्सहस्ररूप्यकमितं भाटकं दृष्ट्वा एकेन पुरुषेण निन्दा कृता। विलासः इति नाम्ना जनाः वञ्चिताः भवन्ति इति तेन कथितम् अस्ति।

नन्दिनी- सत्यम्, नगरस्य स्थितिः तु चिन्ताजनिका अस्ति। परन्तु परोपकारिणः अपि सन्ति। चीनदेशे एकेन "श्रेष्ठपिता" इति प्रसिद्धेन पुरुषेण प्रायः शतत्रयं बालकाः दत्तकरूपेण स्वीकृताः। तेषां भविष्यम् उत्तमम् कर्तुं तेन मार्गः दर्शितः अस्ति।

काव्या- एषा तु शुभवार्ता, सः पुरुषः दयालुः अस्ति। परन्तु लोभः अपि वर्धते। शिशुशिक्षाकेन्द्रे प्रायः सार्धद्विलक्षरूप्यकमितं शुल्कं दृष्ट्वा जनैः चर्चा आरब्धा। इयं स्थितिः नियन्त्रणात् बहिः गता इति सर्वैः अनुभूतम्।

नन्दिनी- शिक्षा तु अधुना व्यापाररूपेण परिणता अस्ति। एषा महार्घता तु भयङ्करी अस्ति। अन्यत्र तु कर्मकरेषु अपि प्रहारः कृतः। एकेन संस्थापकेन स्वस्य सेवकः कार्यमुक्तः कृतः। कृत्रिममेधायाः (AI) प्रयोगः श्लाघनीयः इति तेन अन्तर्जाले प्रचारितम्। एतद् दृष्ट्वा जनाः क्रुद्धाः जाताः सन्ति।

काव्या- अहो! मानवीयता एव नष्टा जाता इति प्रतीयते।